श्रीमन्नारायणाष्टाक्षरी स्तुति

श्रीमन्नारायणाष्टाक्षरी स्तुति

ॐ नमः प्रणवार्थार्थ स्थूल सूक्ष्म क्षराक्षर |
व्यक्ताव्यक्त कळातीत ओंकाराय नमो नमः || 1 ||

नमो देवादिदेवाय देहसंचारहेतवे |
दैत्यसंघविनाशाय नकाराय नमो नमः || 2 ||

मोहनं विश्वरूपं च शिष्टाचारसुपोषितं |
मोहविध्वंसकं वंदे मोकाराय नमो नमः || 3 ||

नारायणाय नव्याय नरसिंहाय नामिने |
नादाय नादिने तुभ्यं नाकाराय नमो नमः || 4 ||

रामचंद्रं रघुपतिं पित्राज्ञापरिपालकं |
कौसल्यातनयं वंदे राकाराय नमो नमः || 5 ||

यज्ञाय यज्ञगम्याय यज्ञरक्षाकराय च |
यज्ञांगरूपिणे तुभ्यं यकाराय नमो नमः || 6 ||

णाकारं लोकविख्यातं नानाजन्मफलप्रदं |
नानाभीष्टप्रदं वंदे णाकाराय नमो नमः || 7 ||

यज्ञकर्त्रे यज्ञभर्त्रे यज्ञरूपाय ते नमः |
सुज्ञानगोचरायाऽस्तु यकाराय नमो नमः || 8 ||

नारायणः परं ब्रह्म नारायणः परंतपः |
नारायणः परो देवः सर्वं नारायणः सदा ||

इति श्री नारायण अष्टाक्षरी स्तुतिः |